# Sadashivaproktam Shivapujamahimopadesham

# સદાશિવપ્રોક્તં શિવપૂજામહિમોપદેશમ્

## Document Information

Text title : Sadashivaproktam Shivapujamahimopadesham

File name : shivapUjAmahimopadeshamsadAshivaproktaM.itx

Category : shiva, shivarahasya, pUjA, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | vAvRittashlokAH ||

Latest update : May 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

# સદાશિવપ્રોક્તં શિવપૂજામહિમોપદેશમ્

પાર્વત્યુવાચ -
મહેશ દેવદેવેશ તવ પૂજનમન્વહમ્ ।
કથં કાર્યં સાધનાનિ કાનિ શમ્ભો તવાર્ચને ॥ ૧॥

શ્રીશિવ ઉવાચ -
નન્દિકેશઃ પુરા દેવિ મામભ્યર્ચ્ય પ્રયત્નતઃ ।
પૂજાવિધાનં પપ્રચ્છ મમૈવ પરમાત્મનઃ ॥ ૨॥

(નન્દિકેશ ઉવાચ)
ગૌરીવલ્લભ દેવેશ સર્વજ્ઞ કરુણાનિધે ।
શિવપૂજાવિધાનં મે નિરૂપય કૃપાનિધે ॥ ૩॥

શિવસ્ય પૂજનાત્પૂર્વં કિં કર્તવ્યં પ્રયત્નતઃ ।
શિવપૂજાવિધાનાનિ કાનિ પાપહરાણિ ચ ॥ ૪॥

કીદૃશઃ શિવપૂજાયામધિકારી મહેશ્વર ।
કીદૃશેન કૃતા પૂજા તવ પ્રિયકરા વિભો ॥ ૫॥

કથં ધ્યેયોઽસિ ભગવન્પૂજનીયઃ કથં ભવાન્ ।
કથં વા પૂજિતો મોક્ષં પ્રયચ્છસિ સદાશિવ ॥ ૬॥

સદાશિવ ઉવાચ -
સાધુ સાધુ ગણશ્રેષ્ઠ પ્રશ્નોઽયં શુભદસ્તવ ।
વક્ષ્યે પૂજાવિધિં સમ્યક્ શ‍ૃણુ સર્વાર્થસાધનમ્ ॥ ૭॥

મહ્યં વિધાય યાં પૂજાં મદ્ભક્તો મત્પરાયણઃ ।
મુચ્યતે સર્વપાપેભ્યઃ સેયં પૂજા મયોચ્યતે ॥ ૮॥

પૂજ્યોઽહમેવ દેવેભ્યઃ સર્વેભ્યો દેવપુઙ્ગવઃ ।
સર્વોત્કર્ષેણ પૂજ્યોઽહં સર્વેભ્યોઽપ્યુત્તમોત્તમઃ ॥ ૯॥

દેવાધિદેવં વિશ્વેશં મહાદેવં જગત્પ્રભુમ્ ।
સર્વોત્કર્ષેણ સમ્પૂજ્ય મુચ્યતે સર્વકિલ્બિષૈઃ ॥ ૧૦॥

યો નિત્યં શિવપૂજાયાં નિરતઃ શિવતત્પરઃ ।
સ વિષ્ણુમુખ્યૈરમરૈઃ પૂજનીયો ન સંશયઃ ॥ ૨૨॥

શિવપૂજાપરં દૃષ્ટ્વા દેવા વિષ્ણુપુરોગમાઃ ।
પૂજનીયં પ્રસ્તુવન્તિ પ્રણમન્તિ મુહુર્મુહુઃ ॥ ૨૩॥

અયં ધન્યતમો મર્ત્યઃ શિવપૂજાપરાયણઃ ।
ભાગ્યવાનિતિ સર્વેઽપિ મન્યન્તે ત્રિદશાઃ સદા ॥ ૨૪॥

યદ્દેહાપગમે મોક્ષો યસ્ય તસ્યૈવ દેહિનઃ ।
મહાદેવસ્ય પૂજાયાં મતિર્ભવતિ નાન્યથા ॥ ૨૫॥

સર્વોત્કર્ષં શિવં મત્વા મામર્ચયતિ યો નરઃ ।
તસ્મૈ દાસ્યામિ કૈવલ્યં નાન્યસ્મૈ સત્યમુચ્યતે ॥ ૨૬॥

યસ્યાસાધારણી ભક્તિર્મયિ સર્વોત્તમે શિવે ।
સ એવ મુક્તિકાન્તાયાઃ કાન્તો ભવતિ નેતરઃ ॥ ૨૭॥

સર્વદેવાધિદેવં માં શિવં યોઽભ્યર્ચયિષ્યતિ ।
સ દેવોરગગન્ધર્વયક્ષપૂજ્યો ભવિષ્યતિ ॥ ૨૮॥

યો મત્પૂજાપરો મર્ત્યસ્તદ્દ્વારિ સકલાઃ સુરાઃ ।
કૃતાઞ્જલિપુટા નિત્યં સ્થાસ્યન્ત્યેવ ન સંશયઃ ॥ ૨૯॥

અનન્યશરણો યસ્તુ શિવપૂજાપરાયણઃ ।
ન તસ્ય સમ્પદો દૂરે સત્યં સત્યં ન સંશયઃ ॥ ૩૦॥

તસ્યૈશ્વર્યં તસ્ય વિદ્યા યસ્ય ભક્તિઃ સદાશિવે ।
તસ્યૈવ મુક્તિરપ્યન્તે સત્યં સત્યં ન સંશયઃ ॥ ૩૧॥

સ એવ સર્વભાગ્યાનામાલયો ભવતિ ધ્રુવમ્ ।
શિવે કિં બહુના યસ્તુ શ્રદ્ધયા શિવમર્ચયેત્ ॥ ૩૭॥

ન તસ્ય નરકાવાસઃ સ મે ભક્તઃ સ મે પ્રિયઃ ।
એકમેવ મહાદેવં ભક્તયા યોઽભ્યર્ચયિષ્યતિ ॥ ૩૮॥

સ શાઙ્કર ઇતિ જ્ઞેયઃ સ એવ મમ સમ્મતઃ ।
એકોઽહં પૂજિતો નિત્યં દાસ્યામિ પરમાં ગતિમ્ ॥ ૩૯॥

સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ।
અનન્યશરણો યસ્તુ સર્વધર્માન્વિહાય મામ્ ॥ ૪૦॥

અર્ચયિષ્યતિ પુણ્યાત્મા સ એવ મમ સમ્મતઃ ।
યઃ શઙ્કરૈકશરણો યઃ શિવૈકાર્ચનપ્રિયઃ ॥ ૪૧॥

સ એવ સર્વધર્માણામાશ્રયો ભવતિ ધ્રુવમ્ ।
ધર્માર્થકામમોક્ષાર્થં મામભ્યર્ચ્ય સદાશિવમ્ ॥ ૪૨॥

ધર્માર્થકામમોક્ષાણામાશ્રયો ભવતિ ધ્રુવમ્ ।
ઐહિકાઽઽમુષ્મિકં વાપિ યો મત્તઃ કાઙ્ક્ષતે ફલમ્ ॥ ૪૩॥

સ મામભ્યર્ચ્ય વિશ્વેશં સમવાપ્નોતિ તત્ફલમ્ ।
મામભ્યર્ચ્ય મહાદેવં સ્વશક્ત્યા મન્મનાઃ સદા ॥ ૪૪॥

કદાચિદપિ દુઃખાનિ ન પ્રાપ્નોત્યેવ માનવઃ ।
યો મદર્પિતસત્કર્મા મદારાધનતત્પરઃ ॥ ૪૫॥

સ મદ્ભક્તસ્તતસ્તેન કૃતા પૂજા મમ પ્રિયા ।
પરમેશ્વરમારાધ્યં સર્વૈશ્વર્યપતિં શિવમ્ ॥ ૪૬॥

પૂજનીયોઽત એવાહં પૂજનીયો નરૈરપિ ।
બ્રહ્મોપેન્દ્રપ્રભૃતયો દેવાઃ સર્વે મુનીશ્વરાઃ ॥ ૪૯॥

મામર્ચયન્તિ મામેવ શરણં પ્રાપ્નુવન્તિ ચ ।
સર્વેભ્ય એવ દેવેભ્યો યતોઽસ્મિ સુમહાનહમ્ ॥ ૫૦॥

તત એવ મહાદેવ વદન્તિ નિગમાશ્ચ મામ્ ।
ન મત્તોઽભ્યધિકો દેવઃ સર્વેભ્યોઽપિ મહાનહમ્ ॥ ૫૧॥

અત એવ મહાદેવઃ પ્રથિતો નિગમેષ્વહમ્ ।
યં યમુદ્દિશ્ય કર્માણિ કરિષ્યન્તિ ફલેપ્સવઃ ॥ ૫૨॥

તાનિ કર્માણિ મય્યેવ પ્રવિશન્તિ ફલપ્રદે ।
ફલપ્રદાતા ભગવાન્કર્મણામહમેવ હિ ॥ ૫૩॥

તસ્માન્મદન્યફલદઃ કર્મણાં નાસ્તિ સર્વથા ।
યં યં યં દેવમુદ્દિશ્ય નમસ્કારાઃ કૃતા નરૈઃ ॥ ૫૪॥

તે સર્વેઽપિ નમસ્કારાઃ પ્રવિશન્તિ ચ માં પ્રિયે ।

યં યં દેવં સમુદ્દિશ્ય યા યા પૂજા કૃતા મુદા ॥ ૫૫॥

સા મયિ પ્રવિશત્યેવ પૂજા સર્વાપિ સર્વથા ।
રાજ્ઞે સાક્ષાદ્ધનં દાતુમશક્તો મનુજઃ સદા ॥ ૫૬॥

અધિકારિમુખાદેવ પ્રવેશયતિ ભૂપતિમ્ ।
સાક્ષાન્મત્પૂજને યસ્તુ સમર્થસ્તેન સર્વદા ॥ ૫૭॥

મમૈવ પૂજા કર્તવ્યા નાન્યદેવસ્ય સર્વદા ।
દ્રવ્યદાને સમર્થો યસ્સાક્ષાદ્રાજ્ઞે નરસ્તથા ॥ ૫૮॥

રાજ્ઞે દ્રવ્યં દદાત્યેવ સાક્ષાન્માનપુરઃસરમ્ ।
અતઃ સાક્ષાદ્ધનં દત્તં યેન રાજ્ઞે મનીષિણા ॥ ૫૯॥

તેન રાજપ્રસાદોઽપિ પ્રાપ્યતે સર્વસૌખ્યદઃ ।
યં સાક્ષાદ્વેત્તિ રાજાનં યસ્તુ રાજપ્રસાદતઃ ॥ ૬૦॥

સ રાજાન્યાન્પ્રધાનાંસ્તુ નારાધયતિ સર્વથા ।
એવમેવ મદર્ચાયામધિકાદરવાન્નરઃ ॥ ૬૧॥

મદન્યં નાર્ચયેદેવ મદન્યઃ ફલદો ન હિ ।
કિમન્યારાધનેનાપિ મદન્યોઽભીષ્ટદસ્તુ કઃ ॥ ૬૨॥

તતોઽહમેક એવાર્યૈઃ પૂજનીયઃ પ્રયત્નતઃ ।
શિવાન્યઃ ફલદોઽસ્તીતિ પ્રવદન્ત્યશિવાસ્તુ યે ॥ ૬૩॥

તાદૃશાનશિવાન્સ્પૃષ્ટ્વા સચેલઃ સ્નાનમાચરેત્ ।
મદન્યઃ કર્મફલદઃ કથં ભવિતુમર્હતિ ॥ ૬૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સદાશિવપ્રોક્તં શિવપૂજામહિમોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . vAvRRittashlokAH ..

Notes:
Upon being requested, Śiva શિવ gives Upadeśa ઉપદેશ to Pārvatī પાર્વતી about the merits of worshipping Him.

Encoded and proofread by Ruma Dewan

*Sadashivaproktam Shivapujamahimopadesham*

pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*